# Viraktavaishnavavivechanam

# વિરક્તવૈષ્ણવવિવેચનમ્

## Document Information

Text title : Shri Saketanivasacharyavirachitam Viraktavaishnavavivechanam

File name : viraktavaiShNavavivechanamsAketanivAsAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : sAketanivAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# વિરક્તવૈષ્ણવવિવેચનમ્

(શ્રીટીલાચાર્ય)

અઙ્ગદદાસ ઉવાચ -

વૈષ્ણવાનાં વિરક્તાનાં સમ્પ્રદાયસ્ય કા ભિદાઃ ।
રીતિં ચ ભવ્યનીતિં ચ પ્રબ્રૂહિ યોગિપુઙ્ગવઃ ॥

શ્રી સાકેતનિવાસાચાર્ય ઉવાચ -

રામાનન્દશ્ચ નિમ્બાર્કો વિષ્ણુસ્વામી ચ મધ્વકઃ ।
ચત્વારઃ સમ્પ્રદાયાસ્તુ નિર્ણીતા ધર્મશાસ્ત્રતઃ ॥ ૧॥

વિષ્ણોશ્ચ વિષ્ણુભક્તાનાં સેવાં કુર્વન્તિ વૈષ્ણવાઃ ।
સ્વાધ્યાયં નિરતં ચૈવ વિશેષઃ ગુરુપૂજનમ્ ॥ ૨॥

પ્રચારકાશ્ચ ધર્મસ્ય સત્સાહિત્યસ્ય સર્જકાઃ ।
ભવન્તિ વૈષ્ણવાઃ સર્વે વિદ્વદ્ભિર્નિશ્ચિતા મતાઃ ॥ ૩॥

ત્યજન્તિ ગૃહસમ્બન્ધં દાનં તપશ્ચ નૈવ ચ ।
કુર્વન્તિ સર્વદાભ્યાસં ધર્મશાસ્ત્રપ્રમાણતઃ ॥ ૪॥

ભૃત્યકાર્યં ન કુર્વન્તિ કુર્વન્તિ દેવપૂજનમ્ ।
બાણી-વિનાયકાનાં ચ કાર્યં કુર્વન્તિ સર્વથા ॥ ૫॥

વિરક્તાનાં ચ સાધૂનાં રામાનન્દાનુયાયિનામ્ ।
ગૃહસ્થત્વં નિષિદ્ધં હિ ધર્મજ્ઞૈઃ સાધુભિર્જનૈઃ ॥ ૬॥

વિરક્તસ્ય ચ ગાર્હસ્થ્યે ધર્મકૃત્યાગ્રહિષ્કૃતિઃ ।
આરૂઢપતિતસ્યાત્ર પ્રાયશ્ચિત્તં ન તસ્ય હિ ॥ ૭॥

વિરક્તગૃહિતાં પ્રાપ્તો ભ્રષ્ટો ધર્માધિકારતઃ ।
મઠ-મન્દિરસમ્પત્તૌ ચાધિકારો ન તસ્ય હિ ॥ ૮॥

સ્વામિત્વે ચાધિકારો ન મઠસ્ય મન્દિરસ્ય ચ ।

અસ્માકં સમ્પ્રદાયસ્ય ચાસૌ પ્રથા હિ વિદ્યતે ॥ ૯॥

સ્વાધિકારાન્ જનઃ સર્વાનારૂઢપતિતસ્ત્યજેત્ ।
સ્થાપનીયો હિ તત્સ્થાને વિરક્તશ્ચાપરો બુધૈઃ ॥ ૧૦॥

વિવાહો નૈવ કર્તવ્યો વિરક્તૈઃ સાધુભિઃ ખલુ ।
સમ્પ્રદાયસ્ય નીતિર્હિ કથિતા મુનિપુઙ્ગવૈઃ ॥ ૧૧॥

સમ્પ્રદાયસ્ય રૂઢિશ્ચ રામાનન્દસ્ય નિશ્ચિતા ।
ભાષિતં શાસ્ત્રકારેણ યોગાદ્રૂઢિર્બલીયસી ॥ ૧૨॥

સપત્નીકો ભવેન્નૈવ દુર્વ્યસની ભવેન્ન ચ ।
ન ભવેલ્લલનાસઙ્ગી સ્વાધ્યાયં ચ ત્યજેન્ન હિ ॥ ૧૩॥

દેવાલયે વિરક્તાનાં સ્ત્રીનિવાસો વિવર્જિતઃ ।
નો ચેદ્ ઘૃતાગ્નિ સંયોગાત્ પ્રદાહોઽપિ ભવેત્ ધ્રુવઃ ॥ ૧૪॥

પ્રાણિસઙ્ઘે દયાં કુર્યાદ્ ધેનુષુ ચ વિશેષતઃ ।
તેષાં સંરક્ષણં કાર્યં જલભોજનદાનતઃ ॥ ૧૫॥

સદાચારી ચ વિદ્વાંશ્ચ શિષ્યઃ કાર્યો હિ સાધુભિઃ ।
ઉદ્ધારઃ સમ્પ્રદાયસ્ય સતાં સેવા યતો ભવેત્ ॥ ૧૬॥

વિજ્ઞઃ સર્વત્ર પૂજ્યસ્તુ કથિતો નીતિ વેદિભિઃ ।
યથા ચન્દ્રસ્તમો હન્તિ તથા શિષ્યો વિચક્ષણઃ ॥ ૧૭॥

સમ્પ્રદાયહિતે મગ્ના યે તુ શિષ્યા ભવન્તિ હિ ।
તે શિષ્યાઃ કથિતાઃ શ્રેષ્ઠાઃ સમ્પ્રદાયસ્ય દેશિકૈઃ ॥ ૧૮॥

ધૂમ્રપાનં ન કુર્યાચ્ચ તદ્ધિ બુદ્ધિવિનાશકમ્ ।
ન દ્યૂતાચરણં કુર્યાત્ કથિતં સાધુબુદ્ધિભિઃ ॥ ૧૯॥

સત્સાહિત્યપ્રચારી ચ શિષ્યસ્તુ બુદ્ધિમાગ્ચ્છુતઃ ।
સમ્પ્રદાયસ્ય તસ્માત્તુ શિષ્યો ભવતિ રક્ષકઃ ॥ ૨૦॥

યે શિષ્યા ગુરુવર્યાણાં સુકીર્તિં વર્ધયન્તિ હિ ।
પૂજનીયશ્ચ તે નિત્યં વન્દ્યાશ્ચ ભુવનત્રયે ॥ ૨૧॥

જપસ્તુ રામમન્ત્રસ્ય રામનામ્નશ્ચ કીર્ત્તનમ્ ।
શિખયા ચોપવીતેન માલોર્ધ્વપુણ્ડ્રધારણમ્ ॥ ૨૨॥

પ્રતિદિનં ચ કર્તવ્યમાચાર્યગ્રન્થચિન્તનમ્ ।
સાયં પ્રાતર્વિધેયા ચ શ્રીસીતારામસંસ્તુતિઃ ॥ ૨૩॥

ચતુર્થ આશ્રમો જ્ઞેયઃ શ્રીયુતં સ્વેતચન્દનમ્ ।
શુક્લકાષાયવસ્ત્રે ચ વિરક્તાનામિતિ શ્રુતાઃ ॥ ૨૪॥

કૌપીનં મુઞ્જસંયુક્તમથવા તૂલજં તથા ।
વૈષ્ણવસ્તુ સદા ધાર્યં હીદં ચાપ્તસમીરિતમ્ ॥ ૨૫॥

અસ્માકં સમ્પ્રદાયસ્ય ઇતિહાસસ્ય સર્જિકા ।
ભવિષ્યતિ અવશ્યં વૈ ટીલાદ્વારપરમ્પરા ॥ ૨૬॥

ઇતિ શ્રીસાકેતનિવાસાચાર્યવિરચિતં વિરક્તવૈષ્ણવવિવેચનં સમાપ્તમ્ ।

Encoded and proofread by Mrityunjay Pandey

---

*Viraktavaishnavavivechanam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*